

अनन्त श्री विभूषित ज्योतिष्पीठाधीश्वर एवं द्वारकाशारदापीठाधीश्वर जगदगुरु शङ्कराचार्य

# स्वामी स्वरूपानन्द सरस्वती

ज्योतिर्मठ
तोटकाचार्य गुफा, चमोली गढ़वाल, उत्तराखण्ड
दूरभाष : 01389-222185

श्रीशारदापीठम्
द्वारका, जामनगर, गुजरात
दूरभाष : 02892-235109



क्रमाङ्क :

दिनाङ्क : ..............................................

स्थल : ..............................................

## ।। शुभाशंसनम् ।।

// कृष्णं वन्दे जगद्गुरुम् //

दिक्कालाद्यनवच्छिन्नमदृष्टोभयकोटिकम् ।
चिन्मात्रमक्षयं शान्तमेकं ब्रह्मास्मि नेतरत् ।।

संसेव्यते सर्वैरपि श्रेय:प्रेय:परम्परामभिलषद्भिर्मानवैरनवरतं गीता भगवन्मुखोद्गीता भवसागर-निमग्नजनतोद्धारिणी परमपावनी सर्वोपनिषत्सारभूता परमानन्दविधायिनी कल्पलता।

तामेतामाश्रित्य समोऽपि जनो यथाधिकारं फलमुपलभते। यथा च महान्तमुदपानं समुपाश्रिता जन्तव:स्वाधिकारानुगुणं स्वल्पकलशपरिमितं बृहत्कुम्भपरिमितं स्वाञ्जलिपरिमितमपरिमितं वा पयस्संसेव्य सुतृप्ता भवन्ति, तद्वदेव श्रीगीताकल्पलतां शरणमुपगच्छन्तोऽपि साधका यथाधिकारं कर्मोपासना-भक्तिज्ञानाद्यर्थावगतिप्रणाड्या पुमंर्थाश्चतुरोऽपि चतुरास्समुपलभन्ते।

श्रीमद्भगवद्गीताया:महातात्पर्यं तु विश्वेऽपि विदन्त्येव विपश्चिदपश्चिमा निखिलशास्त्रनदीष्णा आत्मज्ञानप्रवणा उपनिषदर्थानुसन्धाने कृतभूरिपरिश्रमा उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिरूप-षड्विधतात्पर्यग्राहवैर्लिङ्गैरुपानिषदर्थसंवादेनाचार्योपदेशेनात्मानुभूत्या च समस्तविधशोकमोहाद्यनर्थपरम्परानिवृत्त्युपलक्षितनित्यनिरतिशयाखण्डाद्वितीयात्मतत्वस्वरूपनिरूपण एवेत्यतोऽत्र नास्ति विवादांश:कश्चित् ।

तथापि भगवद्गीतासूपवर्णनमुपलभ्यते निष्कामकर्मयोगस्याष्टाङ्गयोगोपासनानामीश्वरस्य सगुणस्य परमात्मनो निरतिशयप्रेमरूपाया भक्तेश्चेत्यादीनामनेकेषां विषयाणां सामग्र्येण समुपचर्चितानां कूलङ्कषमित्यतो हेतोरेवाभ्युपगन्तव्यं निर्मत्सरैर्विद्वदग्रेसरैरित्यतस्तेष्वपि पूर्वोक्तेष्वर्थेष्ववान्तरं तात्पर्यमुपवर्ण्यते ऽविरुद्धेऽबाधितेऽर्थे देवताधिकरणन्यायेनेति को नाम न जानीयात् ।

सोपानपङ्क्तिक्रमेण सर्वेषामप्यर्थानामधिकृताधिकारभावेनाथवा कस्यचित्पुण्यात्मनो जन्मत एव वा यथाधिकारं समन्वयोऽस्त्येवेति नातिरोहितोऽयमर्थो मनीषिप्रवराणाम् ।

सन्दृश्यन्त एव हि तादृशा व्याख्यातारो बहवोऽपि प्राचीना अर्वाचीनाश्च गीताया नितरां स्वाभिलषितार्थान्समुपवर्णयन्त:। विजानन्त्येव तेऽपि परमार्थभूतमर्थं गीताया:। परं निखिलनरानुजिघृक्षवो जनतासमुद्धरणाय प्रयतन्तोऽमी तत्तदधिकारानुरूपं समुपवर्णयन्ति विषयान्सङ्कलयन्ति च तात्पर्यम् ।नैष दोषो यतो महातात्पर्यस्यास्ति न कोऽपि विरोध इति सन्तुष्यन्त्येवात्रभवन्तो विचक्षणा अपि।

प्रकृतग्रन्थकर्ता ''श्रीमान् मलयज गर्ग'' विज्ञानशास्त्राद्यनेकेष्वाधुनिकविद्याविभागेषु सुशिक्षितो बहुपरिश्रमेण वैज्ञानिकविद्वत्परिचर्ययाध्यात्मिकगुरुजनानुग्रहेण च श्रीमद्भगवद्गीतायास्समग्राया विस्तृतमेकं व्याख्यानमांग्लभाषायामुपनिबन्धेति तद्दर्शनतो मोमुद्यते नश्चेत:। यतो हि साधारणजनताया लोकयात्रापि संसिद्धयेदाध्यात्मिकविद्यासम्बद्धैवेत्युदारमतिरयमत्र प्रदृश्यते। वैज्ञानिकेऽप्याधुनिकेऽपि कालेऽस्मिंश्च सङ्गणकलोके संसिद्ध्येद्भगवत्स्मृतिरनेन पथेति च। वैज्ञानिकैरतिप्रयासेन महता दीर्घेण कालेन



अनन्त श्री विभूषित ज्योतिष्पीठाधीश्वर एवं द्वारकाशारदापीठाधीश्वर जगद्गुरु शङ्कराचार्य

# स्वामी स्वरूपानन्द सरस्वती

ज्योतिर्मठ
तोटकाचार्य गुफा, चमोली गढ़वाल, उत्तराखण्ड
दूरभाष : 01389-222185

श्रीशारदापीठम्
द्वारका, जामनगर, गुजरात
दूरभाष : 02892-235109



क्रमाङ्क :

दिनाङ्क : ..........................................

स्थल : ..........................................

निरूप्यमाणाअप्यर्था भगवता करुणापारावारेण दयालुना सर्वज्ञेन परमात्मना गीताचार्येण श्रीकृष्णेनानायासेन च बहो:कालात्पूर्वमेव गीता गीतास्विति विजानन्तो वैज्ञानिका अप्याधुनिकास्स्मारंस्मारं भगवन्तं संसारार्णवतारकमाश्चर्यचकितासञ्चिन्तयन्त्येवात्मनोऽधमर्णताम् ।

''अनिच्छयापि संस्पृष्टो दहत्येव हि पावक''इति वचनानुसारमेतद्गीतावैज्ञानिकार्थानुसन्धानं जनताया:कल्याणायैव प्रकल्पत इति विश्वसिम:,प्राप्नुवामश्चासीमसन्तुष्टिम् ।

ग्रन्थेऽस्मिन्सनातनधर्मानुयायिनामस्माकं सन्त्येव विप्रातिपन्ना:केचन विषया आचार्यभाष्यतद्व्याख्यानविरुद्धार्था:, स्थालीपुलाकन्यायेनैकमुदाह्रियते तेषु -
''चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश''इति वाक्ये मयेत्यस्मच्छब्देन ''मयाध्यक्षेण प्रकृति:सूयते स चराचर''मिति वचनबलात्परमात्मा ग्राह्यस्तथा किञ्चिदुद्दिश्य किञ्चिविधीयत इति नियमाज्जन्मनासिद्धं जातिमन्तं पुरुषमुद्दिश्योपनयनादिसंस्कारा विधीयन्त इत्यादि प्रमेयान् गीताभाष्यादिग्रन्थभावज्ञा जानन्त्येव नितराम् । तथा च जातिर्जन्मनैव भवति,न कर्मणेति स्पष्टतरमुपलभ्यते। अथापि लोको बम्भ्रमीति कर्मणा जातिरिति, अस्मिन्नेव भ्रमावर्ते गर्ते निपतितोऽयमपि ग्रन्थकर्तेत्येवमादयस्सन्तु नाम।अथापि गुणग्राहिणामस्त्येव तुष्टिस्स्वाभाविकी '' ।

आशास्महे च सर्वलोकप्रवर्तकस्यान्तर्यामिणो जगद्गुरोश्रीकृष्णस्य परमानुकम्पयैतद्ग्रन्थकर्तुर्भूयासुर्मङ्गलसम्पत्परम्परा इति।

हृदि स्मारं स्मारं नारायणं कल्याणान्यनन्तान्याशास्यास्य ग्रन्थस्य प्रचारोऽनवरतमविच्छिन्नो दिक्षु विदिक्षु च सर्वतो भूयादित्याशास्य विरम्यत इति शम् ।

भदौरिया फार्म हाऊस,
भाद्रपद कृ.३,वि.२०७०
२३/०८/२०१३
दिल्ली ।

शुभैषी —
स्वरूपानन्द सरस्वती
स्वामी स्वरूपानन्द सरस्वती
जगद्गुरु शङ्कराचार्य
ज्योतिष्पीठ/ द्वारका शारदापीठ ।